
Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:7(1), July 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# हंससन्देशे लङ्कायाः मार्गनिरूपणम्

## "The Description of the Route to Laṅkā in the *Haṃsa-Sandeśa*"

**BorugaddaSukanya**
Lecturer in Sanskrit,
MOC College,
Jillellamudi
6301835268

**प्रस्तावना:**

सन्देशकाव्येषु मेघसन्देशकाव्यमनुसृत्य अनन्तरवर्तिभिः महाकविभिः बहूनि सन्देशकाव्यानि रचितानि। तेषु मेघसन्देशानन्तरं वेङ्कटनाथकविना कृतं हंससन्देशकाव्यम् प्रसिद्धंवर्तते । वेङ्कटनाथः श्रीवेङ्कटेश्वरस्य अनुग्रहात्जातः इति कथापि लोके प्रसिद्धा। (पादुकासहस्रम् - पीठिका – Page No.2, 3, By SrisailamTatacharya).

वेङ्कटनाथः एव कालान्तरे सन्यासाश्रमस्वीकारात्वेदान्तदेशिकः इति नाम्ना प्रसिद्धः। अयं च वेङ्कटनाथः श्रीमद्रामानुजमतानुयायी विशिष्टाद्वैतसम्प्रदायप्रचारकः पाञ्चरात्रशाखीयः इत्यपि पादुकासहस्रादिकाव्येभ्यः स्पष्टम्भवति । हंससन्देशकथायां मार्गकथनस्य किमनया कवेः मतविषयकचर्चया किं प्रयोजनमितिप्रश्नः भवत्येव । मार्गकथने कवेः वचनेषु सभेदः कथं स्पष्टं भविष्यति इति अग्रे वक्ष्यते।

**मूलकथा:**

सुन्दरकाण्डे हनुमान्सीतां दृष्ट्वा तस्याः सन्देशमादाय "सीताक्षेमवती" इति राममुक्तवान् । युद्धकाण्डारम्भे रामः सुग्रीवादिभिः कृतमन्त्रः जैत्रयात्रामुहूर्तं निश्चितवान् । एवं कृतकार्य निश्चयः सीतां स्मारं स्मारं खिन्नो बभूव । अपि च लङ्का निरालम्बामार्गरहितादुर्गा इत्यपि हनुमद्वचनैः कृतनिश्चयः । रावणं हत्वा सीतां पुनः नेतुं विलम्बो भविष्यति तावत्पर्यन्तं सीतासमाश्वासनीया, लङ्कापि अगम्या सीताकथम् आश्वासनीया इति चिन्तामग्नः रात्रिं नीतवान् ।

**स्थितापारेसमुद्रस्यदूरपारस्यराघव।**
**नौपथश्चापिनास्त्यत्रनिरुद्देशश्चसर्वशः॥** श्रीमद्रामायणम् - युद्धकाण्डे - 3/21 श्लोकः Pg No. 2050.

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:7(1), July 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

कविः लङ्कां गन्तुं समर्थो दूतः हंसः एवेति निश्चित्य रामेणानुभूताम् अवस्थां सीतां निवेदयितुं हंससन्देशकाव्यं रचितवान् । ततः श्रीमद्रामायणे युद्धकाण्डे षष्ठसर्गे रामस्य चिन्ता एव मूलकथा काव्यस्यास्य इति वक्तुं शक्यते।

## कालिदासानुसरणम्


सन्देशकाव्येषु प्रथमं दूतस्य चयनं दूतं प्रतिप्रशंसावाक्यानि ततः स्वावस्थानिवेदनं, सन्देशप्रेषणावसरः, गन्तव्यस्य देशस्यमार्गकथनं, मार्गेद्रष्टव्याः विशेषाः, द्रष्टव्यस्य देशस्य वर्णनं, प्रियायाः अवस्था, सन्देशः इति विषयाः कालिदासदर्शितमार्गेण इतरैः सर्वैः अनुसृताः । तथैव वेङ्कटनाथोऽपि हंसं दूतं दृत्वा लङ्कायाः मार्गं तमुक्तवान् । “मार्गं तावत्श्रुणुकथयतः त्वत्प्रयाणानुरूपम्" इति कालिदासपद्धतिः अत्रापि अनुसृता । लङ्कां गन्तुं द्वितीये मार्गे स्थितेपि तं वर्जयित्वा स्वनिर्दिष्टमार्गेण गन्तव्यं इति रामोक्तौ कवेराशयोपि स्पष्टो भवति । हनुमत्प्रत्यागमनकाले रामलक्ष्मणौ माल्यवत्पर्वते वसतिं चक्रतुः । स च पर्वतः अद्यतन कर्णाटराष्ट्रे होस्पेट समीपे वर्तते । तत्रस्थः हम्पीप्रदेशः एव अद्यापि ऋष्यमूकः इति व्यवहृतः । लङ्कापि माल्यवतः आग्नेय्यां दिशिवर्तते इति मुहूर्तनिर्णयसमये गोविन्दराजीय व्याख्यायां श्रीमद्रामायणे स्पष्टम्। **“लङ्काहिदक्षिणपूर्वस्यांकिष्किन्धायाःअतोनेयंदक्षिणमात्रा।”** श्रीमद्रामायणम् - युद्धकाण्डे– 4/3 श्लोकस्थगोविन्दराजीयव्याख्या। PageNo.2053.

## मार्गनिर्देशने कारणम्

येन मार्गेण हनुमान्पूर्वं लङ्कां गतवान्तं मार्गं परिहृत्य द्वितीयेन मार्गेण गन्तव्यमिति रामः हंसं वदति। अपि च शरत्काले रामेण सन्देशः प्रेषितः इति विषयद्वयं श्रीमद्रामायणात्काव्ये भिन्नतयादृश्यते। श्रीमद्रामायणानुसारेण शरत्कालारम्भे कपयः सीतान्वेषणार्थं गताः हेमन्ते हनुमान्सीतां दृष्ट्वा प्रतिनिवृत्रः। शिशिरे संग्रामयत्नाः कृताः वसन्ते आरम्भे रावणोहतः, रामोऽपि अयोध्यां प्रत्यागत्य पट्टाभिषिक्तः इति कालक्रमो दृश्यते । हंससन्देशकाव्ये शरदिरामः हंसं दूतं प्रेषितवान् इति वर्णितम्। (1/13 श्लोकः Page No.7 हंससन्देशः only Ref.) शारदाः वारिवाहाः छत्रायेरन् इति तत्रोक्तेः एष विषयः स्पष्टो भवति । अपि च शरदि हंसाः भूलोकेन सन्निहिताः भवन्ति, मानसं गच्छन्ति इत्यपि प्रसिद्धः विषयः, किन्तु निरङ्कुशाः कवयः।

## मार्गकथनम्

दक्षिणपूर्वां दिशमुद्दिश्य गमने मार्गद्वयं वर्तते तत्र प्रथमो मार्गः कर्णाटदेशे प्रविश्य पुनःद्रविडदेशं गत्वा रामेश्वरमतिक्रम्य गन्तव्यः । तस्मिन्मार्गे गोकर्णक्षेत्रं, रामेश्वरं, इत्यादीनि गम्यानि भवन्ति । एवं केरलमार्गमनुसृत्य गमनेऽपि अनन्तशयनादि क्षेत्राणां वर्णनम् अपरिहार्यं भवति । कविः द्राविडः (Tamil) ततः द्रविडदेशस्थान्येव क्षेत्राणि वर्णयितुं कृतनिश्चयः प्रथमं मार्गं परिहृतवान् । यानि


Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:7(1), July 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in


दिव्यक्षेत्राणि । अद्यापि तमिलनाडुराष्ट्रे वर्तन्ते तान्येवकविः वर्णितवान् । अद्यतन आन्ध्रप्रदेशे वर्तमानं तिरुपतिक्षेत्रमपि 1953 वत्सरे आन्ध्रराष्ट्रावतरणपर्यन्तं द्रविडराष्ट्रान्तर्गतमेव आसीत् । ततः तमिलनाडुराष्ट्रे वर्तमानानां वैष्णवक्षेत्राणां वर्णनमेव कवेः मुख्याशयः प्रतिभाति।

प्रथममार्गपरिहारे कारणं नित्यवृष्टिः इति कविः यद्वर्णितवान्तदपि सत्यमेव।

**मार्गौ सम्यङ्ममहनुमतावर्णितौद्वौतयोस्ते**

**सह्यासन्नोऽप्यनघसुभगःपश्चिमोनित्यवर्षः।**

**प्राचीनेषुप्रतिजनपदंसंहतावद्भुतानां**

**मन्नादृष्टिःकथमपिसंखे!मत्कृतेतेनिवार्या।।** हंससन्देशः - प्रथमाश्वासः - 18 श्लोकः Page No.10.

हे हंस! माल्यवतः प्रस्थितः लङ्कां जिगमिषुः त्वं प्रथमम् अञ्जनाद्रिं गन्तुमर्हसि । शेषाचलस्य बहुषु नामान्तरेषु वर्तमानेष्वपि आञ्जनेयविषयकप्रीत्यारामः तं पर्वतम् अञ्जनाद्रि नाम्ना व्यवहृतवान् । किन्तु शेषाचलमिति नामापि कविना कीर्तितम् । आदिशेषः एव तत्र पर्वताकृत्यास्थितः शेषशैलः शिरः श्रीशैलः मध्यभागः अहोबिलक्षेत्रं पुच्छमिति पुराणेषु प्रसिद्धम् । तत्र अजनाद्रिं वेङ्कटेश्वरनाम्नाविष्णुः अधितिष्ठति । तं देवं देवाः मनुष्याश्च सर्वपुरुषार्थकामाः सेवन्ते । एवं वेङ्कटेश्वरदर्शनम् ऐहिकामुष्मिकफलप्रदंभवति फलेच्छवः भक्ताः दत्तफलाः भगवता अनुगृहीताः भवन्ति इति विश्वासः स्पष्टमुपवर्णितः।

**तत्रारूढैर्महतिमनुजैस्स्वर्गिभिश्चावतीर्णैः**

**सत्त्वोन्मेषाद्व्यपगतमिथस्तारतम्यादिभेदैः।**

**साधारण्यात्फलपरिणतेरसङ्ख्यशोबध्यमानां**

**शक्त्याकामंमधुविजयिनस्त्वंचकुर्यास्सपर्याम्॥** हंससन्देशः–प्रथमाश्वासः - 22 श्लोकः - Page No.12.

दक्षिणेन अञ्जनाद्रिं सुवर्णमुखरीनदी प्रवहति तत्रैव नदीतीरे कालहस्तीश्वरः वसति । सुवर्णमुखरीनदीं तीत्वीतुण्डीरमण्डलं प्रविशसि तत्रैव श्रीमन्नारायणः हस्तिशैले वरदराजः इति नाम्नावसति। तत्र वरदराजस्य निवासहेतुभूताकापि कथापौराणिकी अपि कवितानिरूपिता । कदाचित्चतुर्मुखः लोकक्षेमाय यज्ञं कर्तुं कृतसंकल्पः धर्मपत्नीसरस्वती तदानीं नसन्निहिता । तस्याः आगमनस्य प्रतिपालने कालातीतो भवतीति धियाब्रह्माकामपि अन्यां परिणीय यज्ञदीक्षां गृहीतवान् । ततः ब्रह्मणे कुपिता सरस्वती वेगवती नाम्ना नदीभूत्वा यज्ञध्वंसं कर्तुं प्रवृत्ता । तदानीं नारायणः हस्तिशैलं सृष्द्वातदधिष्ठाय प्रवाहात यज्ञशालां रक्षितवान् इति कथामपि कविः उदाहृतवान्। (1/29श्लोकः only Ref.)

स्वस्य जन्मस्थानं वरदराजस्य आश्रयभूतमिति हेतोः काञ्चीवर्णनं कविः विस्तरेण कृतवान् । विशेषतः

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:7(1), July 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

ब्रह्मयज्ञकथां पञ्चश्लोकैः (1/29 to 33 श्लोकाः) वर्णितवान् । काञ्ची पतिमपि विस्तरेण मोक्षदायिनं निरूपितवान् ।

**लक्ष्मीविद्युल्ललितवपुषंतत्रकारुण्यपूर्णं**
**माभैषीस्त्वंमरकतशिलामेचकंवीक्ष्यमेघं।**
**शुद्धैर्नित्यंपरिचितपदस्त्वादृशैर्देवहंसैः**
**हँसीभूतस्सखलुभवतामन्ववायाग्रजन्मा॥** हंससन्देशः–प्रथमाश्वासः - 33श्लोकः - Page No.17.

काञ्चीनगरात्पश्चिमां दिशमाश्रित्य त्वयागन्तव्यम् । तत्र पूगारण्यनामके दिव्यक्षेत्रे श्वेतशैले मधुसूदनः त्वयासेव्यः ततः कावेरीतीरं प्राप्स्यसि । कावेरीतीरे श्रीरङ्गनाथः त्वयासेव्यः।

**तीरेतस्या विरचितपदंसाधुभिरसेव्यमानं**
**श्रद्धायोगाद्विनमिततनुश्शेषपीठंभजेथाः।**
**यस्मिन्नस्मत्कुलधनतयासौम्यसाकेतभाजः**
**स्थानंभाव्यंमुनिभिरुदितंश्रीमतोरङ्गधाम्नः॥**

**सत्वेदिव्येस्वयमुदयतस्तस्यधाम्नःप्रसङ्गा**
**न्मञ्जूषायांमरकतमिवभ्राजमानंतदन्तः।**
**चेतोधावत्युपहितभुजंशेषभोगेशयानं**
**दीर्घापाङ्गं जलधितनयाजीवितंदेवमाद्यम्॥** हंससन्देशः–प्रथमाश्वासः – 45, 46श्लोकः

"एवं चोलदेशे रङ्गनाथं सेवित्वा पाण्ड्यदेशः त्वयागन्तव्यः देशद्वय मध्ये अरण्यं चोरैः आक्रान्तं वर्तते । ततः कथञ्चिदवतीर्णः पाण्ड्यं प्रविश्य वृषभाचलं द्रक्ष्यसि । अयं च वृषभाचलः अद्यतन मदुरे समीपे वर्तते । तस्मिन्क्षेत्रे सुन्दरे शनाम्नाविष्णुः वसति किन्तु तत्समीपे एवं "अलहर्कोयल्" नाम्ना विष्णुक्षेत्रं वर्तते स एव विष्णुः कविना उदाहृतः नतु मदुरै मदुरै क्षेत्रे सुन्दरे शनाम्नाप्रसिद्धो महेश्वरः गृहीतः।

**नित्यावासंवृषभमचलंसुन्दराख्यस्यविष्णोः**
**प्रत्यासीदन्सपदिविनतोभागधेयंनतरस्याः।**
**यस्योत्सङ्गेबलिविजयिनस्तस्यमञ्जीरवान्तं**
**पाथोदिव्यंपशुपतिजटास्पर्शहीनंविभाति॥** हंससन्देशः - प्रथमाश्वासः - 49 श्लोकः–Page No.24.

ततः प्रस्थितः समुद्रतीरं प्राप्य तत्र तत्र विश्रान्तः समुद्रं तीर्त्वा सुवेलमचलं प्राप्य लङ्कां द्रक्ष्यसि ।

**तस्मिन्दृश्याभवतिभवतश्चारुसौधावदाता**
**लङ्कासिन्धोर्महितपुलिनेराजहंसीवलीना।**

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:7(1), July 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

Cover Page

**त्वामायान्तंपवनतरलैर्यापताकापदेशैः**

**पक्षैरभ्युज्जिगमिषुरिवस्थास्यतिश्राव्यनादा।।** हंससन्देशः - प्रथमाश्वासः - 60श्लोकः–Page No.29.

**उपसंहारः-**

एवं प्रस्तुत तमिलनाडुराष्ट्रे वर्तमानैः विष्णुप्रधानैः दिव्यक्षेत्रैः पूर्णमिदं मार्गवर्णनं कवेः विशिष्टाद्वैतमतानुयायित्वं नारायणे अनन्यभक्तिं च निरूपयति।

**उपयुक्तग्रन्थमूची**

1. हंससन्देशः - वाविल्लरामस्वामिशास्त्रलु&सन्स् नेताजीसुभाष्चन्द्रबोस्श्रोड्, मद्रास्-1 - 1955.
2. श्रीमद्रामायणम् (व्याख्यात्रयोपेतम्) - परिमल् पब्लिकेशन्स्, दिल्ली – 2012.
3. पादुकासहस्रम् - चौखम्बसंस्कृतसंस्थान, वारणासी –1984.